
# ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ



Tracking:

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 16/08/2012 | **Typing Started on** | **H K Srinivasa Rao** |
| 2 | 16/08/2012 | **Typing Ended on** | **H K Srinivasa Rao** |
| 3 | 16/08/2012 | **I Proof Reading & Correction** | **B S Pavan & H K Srinivasa Rao** |
| 4 | 18/08/2013 | **Published** | **H K Srinivasa Rao** |
| | | | |

## ॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of sri Acharya Madhwa. It is a humble effort to make available this Great work to sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 9901971176, 8095551774, skype Id: SRKARC6070*

*Email :* **srkarc@gmail.com**

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಸರ್ವಮೂಲ ಯಜ್ಞ"

''ಮಾತೃದೇವೋ ಭವ-ಪಿತೃದೇವೋಭವ-ಆಚಾರ್ಯದೇವೋಭವ''

### ಗ್ರಂಥ ಋಣ:ಆಚಾರ್ಯ ಪ್ರಭಞ್ಜನರಿಂದ ಪ್ರಕಾಶಿತವಾದ ಸರ್ವಮೂಲ ಗ್ರಂಥಗಳು

# ॥ सदाचारस्मृति ॥

यस्मिन् सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो याति परं जयति सोऽच्युतः ॥ 1 ॥

स्मृत्वा विष्णुं समुत्थाय कृतशौचो यथाविधि।
धौतदन्तः समाचम्य स्नानं कुर्याद्विधानतः ॥ 2 ॥

उद्धृतेति मृदालिप्य द्विषडष्टषडक्षरैः ।
त्रिर्निमज्याप्यसूक्तेन प्रोक्षयित्वा पुनस्ततः ॥ 3 ॥

मृदालिप्य निमज्य त्रिस्त्रिर्जपेदघमर्षणम् ।
स्रष्टारं सर्वलोकानां स्मृत्वा नारायणं परम् ॥ 4 ॥

यतश्वासो निमग्नोऽप्सु प्रणवेनोत्थितस्ततः ।
सिञ्चयेत् पुरुषसूक्तेन स्वदेहस्थं हरिं स्मरन् ॥ 5 ॥

वसित्वा वास आचम्य प्रोक्ष्याचम्य च मन्त्रतः ।
गायत्र्या चाञ्जलिं दत्वा ध्यात्वा सूर्यगतं हरिम् ॥ 6 ॥

मन्त्रतः परिवृत्याथ समाचम्य सुरादिकान् ।
तर्पयित्वा निपीड्याथ वासो विस्तृत्य चाञ्जसा ॥ 7 ॥

अर्कमण्डलगं विष्णुं ध्यात्वैव त्रिपदीं जपेत् ।
सहस्रपरमां देवीं शतमध्यां दशावराम् ॥ 8 ॥

असूर्यदर्शनात् तिष्ठेत् ततस्तूपविशेत् तु वा ।
पूर्वां सन्ध्यां सनक्षत्रा मुत्तरां सदिवाकराम् ।
उत्तरामुपविश्यैव वाग्यतः सर्वता जपेत् ॥ 9 ॥

ध्येयः सदा सवितृमण्डलमध्यवर्ती नारयणः सहसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी हारी हिरण्ययवपुर्धृतशङ्खचक्रः ॥ 10 ॥

गायत्र्यास्त्रिगुणं विष्णुं ध्यायन्नष्टाक्षरं जपेत् ।
प्रणम्य देवान् विप्रांश्च गुरूंश्च हरिपार्षदान् ॥ 11 ॥

एवं सर्वोत्तमं विष्णुं ध्यायन्नेवार्चयेद्धरिम् ।
ध्यानप्रवचनाभ्यां च यथायोग्यमुपासनम् ॥ 12 ॥

धर्मेणेज्यासाधनानि साधयित्वा विधानतः ।
स्नात्वा सम्पूजयेद्विष्णुं वेदतन्त्रोक्तमार्गतः ।
वैश्वदेवं बलिं चैव कुर्यान्नित्यं तु तर्पणम् ॥ 13 ॥

इष्टं दत्तं हुतं जप्तं पूर्तं यच्चात्मनः प्रियम् ।
दारान् सुतान् प्रियान् प्राणान् परस्मै सन्निवेदयत् ॥ 14 ॥

भुक्तशेषं भगवतो भृत्यातिथिपुरस्सरः ।
भुञ्जेत हृद्गतं विष्णुं स्मरंस्तद्गतमानसः ॥ 15 ॥

आचम्य मूलमन्त्रेण कोष्ठं स्वमभिमन्त्रयेत् ।
वेदशास्त्रविनोदेन प्रीणयन् पुरुषोत्तमम् ।
अहःशेषं नयेत् सन्ध्यामुपासीताथ पूर्ववत् ॥ 16 ॥

यामात् परत एवाथ स्वपेद्ध्यायन् जनार्दनम् ।
अन्तराले ततो बुद्ध्वा स्मरेत बहुशो हरिम् ॥ 17 ॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्याऽऽत्मनावा प्रकृतिस्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयेत् तत् ॥

'द्वाविमौ पुरुषौ लोक क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ 19 ॥

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य भिभर्त्यव्यय ईश्वरः ॥ 20 ॥

यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ 21 ॥

यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् ।
स सर्वविद्भजति मां सर्वभावेन भारत ॥ 22 ॥

इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।
एतद्बुद्ध्वाबुद्धिमानास्यात् कृतकृत्यश्च भारत ' ॥ 23 ॥

' रुद्रं समाश्रिता देवा रुद्रो ब्रह्माणमाश्रितः ।
ब्रह्मा मामाश्रितो नित्यं नाहं किञ्चिदुपाश्रितः ' ॥ 24 ॥

' ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥ 25 ॥

ये त्वेतदभ्यसूयन्ते नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः ' ॥ 26 ॥

' द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ।
विष्णुभक्तिपरो दैवो विपरीतस्तथाऽसुरः ' ॥ 27 ॥

‘ स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न चातुचित् ।
सर्वे विधिनिषेधाः स्युरेतयोरेव किङ्कराः ॥ 28 ॥

‘ धर्मो भवत्यधर्मोऽपि कृतो भक्तैस्तवाच्युत ।
पापं भवति धर्मोऽपि यो न भक्तैः कृतो हरेः ॥ 29 ॥

‘ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
नित्यं भवेच्च मन्निष्ठो बुभुषुः पुरुषस्सदा ’ ॥ 30 ॥

एष नित्यः सदाचारो गृहिणो वनिनस्तथा ।
वैश्वदेवं बलिं दन्तधावनं चाप्यृते वटोः ॥ 31 ॥

एवमेव यतेः स्वीयवित्तेन तु विना सदा ।
मूलमन्त्रैः सदा स्नानं विष्णोरेव च तर्पणम् ॥ 32 ॥

विशेषो निष्क्रियतेरजलाञ्जलिता तथा ।
तर्पणं तु हरेरेव यतेरन्यत्र चोदितम् ।
समिद्धोमो वटोश्चैव स्मृत्वा विष्णुं हुताशने ॥ 33 ॥

सर्ववर्णाश्रमैर्विष्णुरेक एवेज्यते सदा ।
रमाब्रह्मादयस्तस्य परिवारत एव तु ॥ 34 ॥

‘ कविं पुराणामनुशासितारमणोरणीयांसमनुस्मरेद्यः ।
सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमसः परस्तात् ॥ 35 ॥

‘ वेदाहमेतम् पुरुषं महान्तं आदित्यवर्णं तमसस्तु पारे ।
सर्वाणि रूपाणि विचिन्त्य धीरः नामानि कृत्वाऽभिवदन्यदास्ते ॥ 36 ॥

धाता पुरस्ताद्यमुदाजहार शक्रः प्रविद्वान् प्रदिशश्चतस्त्रः ।
तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते ’ ॥ 37 ॥

आनन्दतीर्थमुनिना व्यासवाक्यसमुद्धृतिः ।
सदाचारस्य विषये कृता सङ्क्षेपतः शुभा ॥ 38 ॥

अशेषकल्याणगुणनित्यानुभवसत्तनुः ।
अशेषदोषरहितः प्रीयतां पुरुषोत्तमः ॥ 39 ॥

**॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिता सदाचारस्मृतिः ॥**

**॥ श्रीकृष्णार्पणमस्तु ॥**

**॥ मुख्यप्राण वशो सर्वं स विष्णोर्वशगः सदा ॥**

**॥ प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डानम् ॥**